संस्कृतम् "शेमुषी" SHEMUSHI

# 1 अभ्यासप्रश्नपत्रम्

समय : होरात्रयम्] [पूर्णाङ्काः : 80

**निर्देशः** : अस्मिन् प्रश्नपत्रे चत्वारि खण्डानि सन्ति। सर्वेषां प्रश्नानाम् उत्तराणि क्रमानुसारं दीयताम्।

## खण्डः 'क' अपठित-अवबोधनम् (5 अङ्काः)

1. **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत–**

कस्मिंश्चिद्देशे धर्मबुद्धिः पापबुद्धिश्च द्वे मित्रे प्रतिवसतः स्म। अथ कदाचित्पापबुद्धिना चिन्तितम्– अहं तावन्मूर्खो दरिद्रश्च। तदेनं धर्मबुद्धिमादाय देशान्तरं गत्वा अस्य आश्रयेण अर्थोपार्जनं कृत्वा एनमपि वञ्चयित्वा सुखी भवामि इति। अथान्यस्मिन्नहनि पापबुद्धिः धर्मबुद्धिं प्राह– भो मित्र! शास्त्रेष्वेवं वर्णितम् यद् येन देशान्तरेषु गत्वा बहुविधभाषावेषादिकं न ज्ञातं तस्य जन्म धरणीपीठे निरर्थकम्। अतः आवां देशान्तरं गच्छावेति। देशान्तरं गत्वा तौ परिश्रमं कृत्वा प्रभूतं धनम् अर्जितवन्तौ। एकदा तौ अर्जितं धनं नीत्वा गृहं प्रति आगच्छताम्। गृहं प्राप्य पापबुद्धिः धर्मबुद्धिः च सम्पूर्णं धनं एकस्य वृक्षस्य मूले निक्षिप्तवन्तौ। पुनः एकदा पापबुद्धिः निशायां गत्वा वृक्षस्य मूलं खनित्वा सर्वं धनं प्राप्तवान्।

**I. एकपदेन उत्तरत–**

(*i*) धर्मबुद्धेः मित्रस्य किं नाम आसीत्? (*ii*) कः वृक्षस्य मूलं खनित्वा सर्वं धनं प्राप्तवान्?

**II. पूर्णवाक्येन उत्तरत–**

(*i*) पापबुद्धिः कस्य आश्रयेण अर्थोपार्जनं कर्तुम् इच्छति? (*ii*) पुनः एकदा पापबुद्धिः किं प्राप्तवान्?

**III. भाषिककार्यम्–**

(*i*) 'एकदा तौ' अत्र 'तौ' पदं काभ्यां प्रयुक्तम्?
(क) धर्मबुद्धये (ख) धर्मबुद्धिभ्याम् (ग) पापबुद्धये (घ) धर्मबुद्धिपापबुद्धिभ्याम्

(*ii*) 'रात्रौ' इत्यस्य पदस्य कः पर्यायः अत्र आगतः?
(क) प्रभूतम् (ख) एकदा (ग) निशायाम् (घ) नीत्वा

(*iii*) अन्तिमे वाक्ये अव्ययपदं किम्?
(क) पापबुद्धिः (ख) वृक्षस्य (ग) निशायाम् (घ) पुनः

(*iv*) अनुच्छेदे 'आवाम्' कर्तृपदस्य क्रियापदं किम्?
(क) गच्छाव (ख) गच्छावः (ग) गच्छवेति (घ) इति

## खण्डः 'ख' रचनात्मक-कार्यम् (15 अङ्काः)

2. **मञ्जूषायां प्रदत्तपदानां सहायतया शुल्कक्षमार्थं प्रधानाचार्याय लिखितं प्रार्थनापत्रं पूरयत–**

सेवायाम्, परीक्षाभवनम्
मान्याः (*i*) ............................ तिथिः ............................
क०ख०ग० विद्यालयः,
अ०ब०स० नगरम्।
(*ii*) ............................

(*iii*) ............................ अस्ति यत् मम पिता एकस्मिन् (*iv*) ............................ लिपिकः अस्ति। तस्य परिमिते रिवारस्य पञ्च सदस्यानां निर्वाहः (*v*) ............................ क्रियते। विद्यालयस्य (*vi*) ............................ तु असम्भवम् (*vii*) ............................ मम अध्ययने (*viii*) ............................ न स्यात् अतः मम शुल्कं क्षमां कृत्वा अनुग्रहं कुर्वन्तु

।

............................

भवताम् (*x*)............................

क०ख०ग०

नवमी श्रेणी

**मञ्जूषा**

| |
|---|
| कठिनतया, सधन्यवादम्, महोदय!, निवेदनम्, आज्ञाकारी शिष्यः, प्राचार्यमहोदयाः, व्यवधानम्, कार्यालये, धनाभावे, शुल्कप्रदानम् |

**खेतां मञ्जूषां दृष्ट्वा तस्याः च पदानि आदाय 'स्वाधीनतायाः पीडा कथा' इति विषयमधिकृत्य सरलसंस्कृते पञ्च वाक्यानि लिखत–**

**मञ्जूषा**

| |
|---|
| त्रिषष्टिः, वर्षाणि, मम, नाम, स्वाधीनता, भ्रष्टाचारेण, चतुर्दिक्, पीडिता, जनता, त्रस्ता, अधिकारिणः, मन्त्रिणः, भ्रष्टाः, अहम्, चलितुम् शक्ये |

**अथवा**

**ष्ट्वा प्रदत्तपदानां सहायतया चित्रस्य वर्णनं पञ्चसु संस्कृतवाक्येषु कुरुत–**



**मञ्जूषा**

| |
|---|
| पर्यावरणस्य, असंतुलिता स्थितिः, वृक्षारोपणेन, वृक्षारोपणम्, वनानां, कर्तनं, भूमिः, कुरुतः, पर्यावरणं, सुरक्षितव्यम्, वृक्षाः, द्वौ बालौ, जीवनं, सुरक्षितम्, वृक्षाः, रोपणीयाः |

4. **अधोलिखितवाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत–**

(*i*) पक्षी पेड़ पर बैठे हैं।
(*ii*) बालक साँप से डरता है।
(*iii*) सरला धीरे-धीरे चलती है।
(*iv*) गंगा हिमालय से निकलती है।
(*v*) सड़क के दोनों ओर वृक्ष हैं।

## खण्डः 'ग' अनुप्रयुक्त-व्याकरणम् (25 अङ्काः)

5. **I.** (*i*) **उपयुक्तवर्णेन रिक्तस्थानं पूरयत–**

सम्राट् = स् + अ + ............................ + र् + आ + ट्

(*ii*) **प्रदत्तवर्णानां संयोजनं कृत्वा लिखत–**

य् + अ + ज् + ञ् + ई + य् + अ : = .............................।

**II. अधोलिखितप्रश्नानाम् उत्तराणि लिखत–**

(*i*) 'ह्, प् च्, ढ्' वर्णेषु कः वर्णः कण्ठ्यः अस्ति?
(*ii*) 'ऊ' वर्णस्य उच्चारणस्थानं किम् अस्ति?

6. **रेखाङ्कितपदानां सन्धिं विच्छेदं वा कृत्वा लिखत–**

(*i*) अद्य + अवकाशः अस्ति।
(*ii*) छात्राः अध्ययने तल्लीनाः सन्ति।
(*iii*) तेन सह जगदीशः नास्ति।
(*iv*) खन्यमाना भूमिः + तोयं ददाति।

7. **उचितैः शब्दरूपैः वाक्यानि पूरयत–**

(*i*) ................................................. वृक्षात् वृक्षे कूर्दन्ति। (कपि)
(*ii*) छात्राः ................................................. वन्दनां कुर्वन्ति। (सरस्वती)
(*iii*) बालकाः ................................................. रचयन्ति। (चित्र)
(*iv*) माता ................................ बालकेभ्यः भोजनं यच्छति। (तत्)
(*v*) मम ................................................. मित्राणि सन्ति। (चतुर्)
(*vi*) एकस्मिन् मासे ........................................ पक्षौ भवतः। (द्वि)

8. **उपयुक्त-धातुरूपैः वाक्यानि पूरयत–**

(*i*) अहं श्वः पाठं .................................................................। (पठ्)
(*ii*) ह्यः त्वं कुत्र .................................................................? (अस्)
(*iii*) पुत्राः सदैव पितरं ........................................................। (सेव्)

9. **उचितविभक्तिपदैः वाक्यानि पूरयत–**

(*i*) भिक्षुकः ................................................. काणः अस्ति। (नेत्र)
(*ii*) ................................................. बहिः जलाशयः अस्ति। (ग्राम)
(*iii*) ................................................. परितः गोपाः सन्ति। (कृष्ण)
(*iv*) ................................................. गंगा श्रेष्ठा वर्तते। (नदी)

10. **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययविभागं संयोजनं वा कृत्वा लिखत–**

(*i*) श्यामः बसयानम् आ + रुह् + ल्यप् आपणं गच्छति।
(*ii*) जनाः स्नै + तुमुन् गङ्गां प्रति गच्छन्ति।
(*iii*) तं पुत्रं लब्ध्वा सः प्रासीदत्।

11. **अधोलिखितवाक्येषु रेखाङ्कितपदेभ्यः उपसर्गं धातुं च पृथक् कृत्वा लिखत–**

(*i*) बालकः पितरम् अनुकरोति। (*ii*) मह्यं तण्डुलमूल्यं प्रयच्छ।

(*iii*) शिष्यः गुरुम् उपगच्छति। (*iv*) पुत्रः मातरं प्रणमति।

## खण्डः 'घ' पठित-अवबोधनम् (35 अङ्काः)

12. **अधोलिखितं गद्यांशं, पद्यांशं नाट्यांशं च पठित्वा प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत–**

(अ) तस्मिन्नेव ग्रामे एकाऽपरा लुब्धा वृद्धा न्यवसत्। तस्याः अपि एका पुत्री आसीत्। ईर्ष्यया सा तस्य स्वर्णकाकस्य रहस्यमभिज्ञातवती। सूर्यातपे तण्डुलान्निक्षिप्य तयापि स्वसुता रक्षार्थं नियुक्ता। तथैव स्वर्णपक्षः काकः तण्डुलान् भक्षयन् तामपि तत्रैवाकारयत्। प्रातस्तत्र गत्वा सा काकं निर्भर्त्सयन्ती प्रावोचत्–भो नीचकाक! अहमागता, मह्यं तण्डुलमूल्यं प्रयच्छ। काकोऽब्रवीत्–अहं त्वत्कृते सोपानमुत्तारयामि। तत्कथय स्वर्णमयं रजतमयं ताम्रमयं वा। गर्वितया बालिकया प्रोक्तम्–स्वर्णमयेन सोपानेनाहमागच्छामि परं स्वर्णकाकस्तत्कृते ताम्रमयं सोपानमेव प्रायच्छत्। स्वर्णकाकस्तां भोजनमपि ताम्रभाजने ह्यकारयत्।

**I. एकपदेन उत्तरत–**

(*i*) तस्मिन् एव ग्रामे कीदृशी वृद्धा न्यवसत्?

(*ii*) स्वर्णकाकः तां बालिकां कस्मिन् भोजनम् अकारयत्?

**II. पूर्णवाक्येन उत्तरत–**

(*i*) सा वृद्धा ईर्ष्यया किम् अभिज्ञातवती?

(*ii*) काकः गर्वितायाः बालिकायाः कृते कीदृशं सोपानमेव प्रायच्छत्?

**III. भाषिककार्यम्–**

(*i*) अनुच्छेदे 'अकारयत्' इति क्रियायाः कर्तृपदं किम्?

(क) स्वर्णकाकः (ख) काकः (ग) ताम् (घ) भोजनम्/कस्यै

(*ii*) 'मह्यं तण्डुलमूल्यं प्रयच्छ'। अत्र 'मह्यम्' इति पदं कस्मै प्रयुक्तम्?

(क) गर्वितायै (ख) कन्यायै (ग) गर्विता-कन्यायै (घ) काकाय

(*iii*) अनुच्छेदे 'लुब्धा वृद्धा' इति कर्तृपदस्य क्रियापदं किमस्ति?

(क) आसीत् (ख) न्यवसत् (ग) अभिज्ञातवती (घ) नियुक्ता

(*iv*) 'प्रशंसयन्ती' इति पदस्य कः विपर्ययः अनुच्छेदे आगतः?

(क) गर्विता (ख) अभिज्ञातवती (ग) प्रावोचत् (घ) निर्भर्त्सयन्ती

(ब) निनादय नवीनामये वाणि! वीणाम्
मृदुं गाय गीतिं ललित-नीति-लीनाम्।

**I. एकपदेन उत्तरत–**

(*i*) वाणी कीदृशीं वीणां निनादयतु?

(*ii*) सा कीदृशीं गीतिं गायतु?

**II. पूर्णवाक्येन उत्तरत–**

(*i*) अस्मिन् श्लोके कविः वाणीं किं कीदृशञ्च गातुं प्रार्थयति?

(*ii*) कवेः अनुसारं सरस्वती (वाणी) कां निनादयतु?

**III. निर्देशानुसारम् उत्तरत–**

(*i*) 'नवीनाम् वीणाम्' अनयोः पदयोः विशेषणपदं किम्?

(क) वीणा (ख) नवीनाम् (ग) वीणाम् (घ) नवीना

(*ii*) 'निनादय नवीनामये वाणि! वीणाम्।' अत्र वाक्ये क्रियापदं किमस्ति?
(क) वाणि (ख) वीणाम् (ग) नवीनाम् (घ) निनादय

(*iii*) श्लोके 'कोमलाम्' इत्यस्य पदस्य अर्थे किं पदम् आगतम्?
(क) मृदुम् (ख) गीतिम् (ग) नीति-लीनाम् (घ) वीणाम्

(*iv*) अत्र श्लोके 'सरस्वति' इत्यस्य पदस्य कः पर्यायः लिखितः?
(क) वाणि (ख) वीणा (ग) गीतिम् (घ) मृद

**(स)** (ततः प्रविशति साटोपं कोपं निरूपयन्ती श्वश्रूः)

विमला – अम्ब! किमादिशसि?

श्वश्रूः – (विडम्बयन्ती) किमादिशसि? किमिदानीमपि महादेव्याः प्रभातकालो न सञ्जातः?

विमला – प्रातःकालिकं कार्यजातमेव सम्पादयामि।

श्वश्रूः – प्रातःकालिकं कार्यजातं सम्पादयसि। इदानीमपि चायपेयस्य नास्ति कापि कथा। तव पिता आगत्य साधयिष्यति किं चायं... येन काकिणी अपि न दत्ता...

विमला – मम पितृपादम् किमर्थं कदर्थयसि अम्ब! यत्किमपि कथनीयं मां प्रत्येव कथय।

श्वश्रूः – (सभ्रूभङ्गं सभुजक्षेपं च) (अयृ हयृ) शृणुत अस्याः दुष्टायाः अधरोत्तरम्। एतावानेव प्रियो यदि पिता तर्हि तत्रैव गत्वा कथं न मृता पितुर्गृहे...?

**I. एकपदेन उत्तरत–**

(*i*) विमला कीदृशं कार्यजातं सम्पादयति?
(*ii*) विमलायाः श्वश्रूः कं कदर्थयति?

**II. पूर्णवाक्येन उत्तरत–**

(*i*) श्वश्रू-अनुसारम् इदानीमपि कः न सञ्जातः?
(*ii*) संवादस्य अन्तिमे वाक्ये श्वश्रूः किम् उक्त्वा विमलाम् आक्षिपति?

**III. भाषिककार्यम्–**

(*i*) संवादे 'सञ्जातः' इत्यस्याः क्रियायाः कर्तृपदं किम्?
(क) किम् (ख) इदानीम् (ग) प्रभातकालः (घ) महादेव्याः

(*ii*) 'तव पिता आगत्य'। अत्र 'तव' इति पदं कस्यै प्रयुक्तम्?
(क) विमलायै (ख) सोमप्रभायै (ग) श्वश्र्वै (घ) पुत्र्यै

(*iii*) संवादे 'मां प्रति' अत्र प्रति पदस्य योगे 'मां' पदे का विभक्तिः प्रयुक्ता?
(क) प्रथमा (ख) तृतीया (ग) द्वितीया (घ) सप्तमी

(*iv*) 'गत्वा' इत्यस्य पदस्य किं विपर्ययपदम् अत्र संवादे प्रयुक्तम्?
(क) आगत्य (ख) कथय (ग) कथनीयम् (घ) अयृ हयृ

**13. अधोलिखितस्य श्लोकद्वयस्य अन्वयम् उचितपदैः पूरयत–**

**I.** गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा।
गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः॥

**अन्वयः–** पुरुषैः (*i*) .............. गुणेषु (*ii*) .............. हि प्रयत्नः (*iii*) .............. दरिद्रः (*iv*) .............. गुणयुक्तः (नरः) ईश्वरैः अगुणैः समः (न भवति)।

**मञ्जूषा**

| अपि, एव, कर्तव्यः, सदा |
|---|

**II.** सा तदा करुणा वाचो विलपन्ती सुदुःखिता।
वनस्पतिगतं गृध्रं ददर्शायतलोचना॥

**अन्वयः**– तदा करुणा (*i*) ............ विलपन्ती सुदुःखिता (*ii*) ............ सा (सीता) (*iii*) ............ गृध्रम् (*iv*) ............ ।

**मञ्जूषा**

| |
|---|
| आयतलोचना, ददर्श, वाचः, वनस्पतिगतम् |

**अथवा**

**अधोलिखितस्य श्लोकस्य भावार्थं मञ्जूषायाः पदसहायतया पूरयत–**

लतानां नितान्तं सुमं शान्तिशीलम्
चलेदुच्छलेत्कान्तसलिलं सलीलम्,
तवाकर्ण्य वीणामदीनां नदीनाम्॥
निनादय...॥

**भावार्थः**– हे सरस्वति मातः! तव (*i*) ............ वीणानादं श्रुत्वा लतानां (*ii*) ............ शान्तिशीलं सुमनं (*iii*) ............ नदीनाञ्च मनोहरं (*iv*) ............अपि उच्छलेत्। अतः हे वाणि शारदे! त्वं नवीनां वीणां वादय।

**मञ्जूषा**

| |
|---|
| कम्पेत् (चलेत्), जलम्, ओजपूर्णम्, नितान्तम् |

**14. अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं क्रियताम्–**

(*i*) एकस्मिन् ग्रामे निर्धना स्त्री अवसत्।
(*ii*) अद्य अहं विद्यालयं न गमिष्यामि।
(*iii*) पुरुषनिरीक्षकेण सह सोमप्रभा प्रविशति।
(*iv*) तपोदत्तः कुटुम्बिभिः मित्रैः गर्हितः अभवत्।
(*v*) वृक्षकर्तनात् शुद्धवायुः न प्राप्यते।

**15. अधोलिखितवाक्यानि घटनाक्रमानुसारं पुनर्लिखत–**

(*i*) बालिका सूर्योदयात् पूर्वम् एव तत्र उपस्थिता अभवत्।
(*ii*) यदा मञ्जूषां सा उद्घाटितवती तदा तस्यां महार्हाणि हीरकाणि दृष्ट्वा सा प्रसन्ना जाता।
(*iii*) यदा काकः शयित्वा प्रबुद्धः जातः तदा सः स्वर्णगवाक्षात् अवदत्।
(*iv*) कस्मिंश्चिद् ग्रामे एका धनहीना वृद्धा स्त्री अवसत्।
(*v*) बालिका अकथयत्–अहं ताम्रस्थाल्यामेव भोजनं करिष्यामि।
(*vi*) बालिके! त्वम् आगता? तिष्ठ, अहं तव कृते सोपानम् अवतारयामि।
(*vii*) सा काकं भर्त्सयन्ती अवदत्।
(*viii*) परं स्वर्णसोपानेन सा स्वर्णभवनम् अगच्छत्।

**16. अधोलिखितपदानां तेषां पर्यायपदैः सह मेलनं कुरुत–**

| | | |
|---|---|---|
| (*i*) विलपन्ती | – | हंसैः |
| (*ii*) बभञ्ज | – | तरवः |
| (*iii*) मरालैः | – | रोदन्ती |
| (*iv*) वृक्षाः | – | अत्रोटयत् |

5. नकुलं मृतं निरीक्ष्य ब्राह्मणः परं विषादम् अगच्छत्।

(क) निर् + इक्ष् + ल्यप् (ख) निर् + ईक्ष् + क्त्वा (ग) निर् + ईक्ष् + ल्यप् (घ) निरीक्ष् + क्त्वा

6. किन्तु सभां प्रविश्य पश्यामि।

(क) प्र + विश् + क्त्वा (ख) प्र + विश् + ल्यप् (ग) प्रविश् + यत् (घ) प्र + विश + ल्यप्

7. भामाशाहम् अभिलक्ष्य प्रतापः वदति।

(क) अभिलक्ष् + तव्यत् (ख) अभिलक्ष् + क्त्वा (ग) अभि + लक्ष्य + ल्यप् (घ) अभि + लक्ष् + ल्यप्

8. सः मुनिः तां प्रणम्य तद् गृहाद् निरगच्छत्।

(क) प्र + नम् + ल्यप् (ख) प्र + णम् + ल्यप् (ग) प्रनम् + क्त्वा (घ) प्रणम् + यत्

9. सः मुनिः एकं ब्राह्मणगृहम् एत्य भिक्षाम् अचायत्।

(क) ए + ल्यप् (ख) आ + इ + ल्यप् (ग) आ + इ + क्त्वा (घ) एत् + ल्यप्

10. बाढम्। (उपेत्य) जयतु आर्यः।

(क) उप + इ + क्त्वा (ख) उपेत् + ल्यप् (ग) उप + इ + ल्यप् (घ) उप + ई + यत्

11. सः तं व्यापाद्य खण्डशः कृतवान्।

(क) वि + आ + पद + ल्यप् (ख) व्यापद् + क्त्वा

(ग) विपद् + क्त्वा (घ) वि + आ + पद् + ल्यप्

[CBSE 2010]

12. सज्जनाः विचार्य एव कार्यं कुर्वन्ति।

(क) वि + चर् + ल्यप् (ख) वि + चार् + ल्यप् (ग) वि + चर + य (घ) वि + चर् + लप्

[CBSE 2011]

13. छात्रः शिक्षकं प्रणम्य गच्छति।

(क) प्र + णम् + ल्यप् (ख) प्रण + म्यप् (ग) प्र + नम् + ल्यप् (घ) प्रनम + ल्यप्

[CBSE 2011]

14. रमा वि + हस् + ल्यप् वार्तालापं करोति।

(क) विहस्य (ख) विहसय (ग) विहाय (घ) विहृस्य

[CBSE 2011]

15. सेवकः नृपं प्र + नम् + ल्यप् उपविशति।

(क) प्रणम्य (ख) प्रणत्वा (ग) प्रणमितुम् (घ) प्रणयन्

[CBSE 2011]

16. सैनिकाः सीमाप्रदेशं प्राप्य देशं रक्षन्ति।

(क) प्राप् + यप् (ख) प्र + आप् + ल्यप् (ग) प्र + ल्यप् (घ) प्राप् + य

[CBSE 2011]

17. आलस्यं वि + हा + ल्यप् उद्यमं कुरु।

(क) विहाय (ख) वीहाय्य (ग) विहत्वा (घ) विहातुम्

[CBSE 2011]

18. त्वं समाचारं वि + ज्ञा + ल्यप् गच्छ।

(क) विज्ञाय (ख) विज्ञातम् (ग) विज्ञातुम् (घ) विज्ञात्वा

19. देवं सम्पूज्य पाठं पठ।

(क) सम् + पूज् + ल्यप् (ख) सम् + पुज् + शतृ (ग) सम् + पूज + ल्यप् (घ) सम् + पूज्य

**प्रकृतिप्रत्ययानां समुचितं संयोजनं कृत्वा रिक्तस्थानानि सम्पूरयन्ताम्–**

20. विद्यालयम् ........................................ त्वं किं करोषि? (आ + गम् + ल्यप्)
21. महापुरुषाः जनान् ........................................ प्रसीदन्ति। (उप + कृ + ल्यप्)
22. कदापि जनान् ........................................ मा प्रसीदेत्। (तिरस् + कृ + ल्यप्)
23. माता पुत्रम् ........................................ संलपति। (उप + गम् + ल्यप्)
24. जनानां कष्टम् ........................................ मुनयः सीदन्ति। (अनु + भू + ल्यप्)
25. ते सर्वे सुखम् ........................................ मोदन्ते। (अनु + भू + ल्यप्)
26. छात्रः कक्षायाः ........................................ उद्यानं गच्छति। (निर् + गम् + ल्यप्) **[CBSE 2012]**

**रेखाङ्कितेषु पदेषु प्रकृतिप्रत्यययोः विभाजनं कुरुत–**

27. प्रतापः स्वदेशं परित्यज्य कुत्र गतः?
28. उमा महेशं प्रणम्य उपाविशत्।
29. तं वक्रदेहं वीक्ष्य पण्डिताः तारस्वरेण अहसन्।
30. नगरपालं समाहूय भवान् आदिश्यताम्।
31. तव कष्टं संश्रुत्य अहं व्याकुलो जातः।
32. सीता भरतं प्राप्य प्रासीदत्।
33. नम्रताम् अनुभूय को न प्रसीदति?
34. पाणिपादम् प्रक्षाल्य कृषकः भोजनाय उपातिष्ठत्।
35. गुरुम् उपगम्य तस्य सेवाम् कुरु।
36. श्वेतकेतुः वेदान् अधीत्य गृहम् प्रत्यागच्छत्। **[CBSE 2012]**

## मिश्रित–अभ्यासप्रश्नाः

### बहुविकल्पीयाः/सैद्धान्तिक-प्रश्नाः

**प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत–**

1. **शिशुः मातरं दृष्ट्वा प्रसीदति।**
(क) दृश् + क्त (ख) दृश् + क्त्वा (ग) दृश् + तुमुन् (घ) दृश् + त्व
2. **मोहनः पुस्तकानि क्रेतुम् गमिष्यति।**
(क) क्री + वत् (ख) कृ + तुमुन् (ग) कृ + त्व (घ) क्री + तुमुन्
3. **छात्रः गुरुं प्र + नम् + ल्यप् उपविशति।**
(क) प्रणम्य (ख) प्रणत्वा (ग) प्रणमितुम् (घ) प्रणयन्
4. **छात्रः विद्यालयम् आ + गम् + ल्यप् पठति।**
(क) आगम्य (ख) आगत्वा (ग) आगन्तुम् (घ) आगतः

**5. रामः रावणं हन् + क्त्वा अयोध्यां प्रत्यागच्छत्।**

(क) हनित्वा (ख) हन्तुम् (ग) हत्वा (घ) हनवा

**6. माता भोजनं पच् + तुमुन् महानसं प्रविशति।**

(क) पचितुम् (ख) पकतुम् (ग) पक्तुम् (घ) पक्तम्

**7. बालः आपणं गन्तुं सज्जः भवति।**

(क) गम् + क्त्वा (ख) गम् + ल्यप् (ग) गम् + तुमुन् (घ) गम् + क्त

**8. प्रभा गृहकार्यं कृ + क्त्वा विद्यालयं गच्छति।**

(क) कृत्वा (ख) क्रेतुम् (ग) कृतवा (घ) क्रित्वा

**9. छात्रः पुस्तकालयम् आ + गम् + ल्यप् पठति।** **[CBSE 2011]**

(क) आगम्य (ख) आगत्वा (ग) आगन्तुम् (घ) आगतः

**10. छात्राः विद्यालयं प्रविश्य गुरुं नमन्ति।** **[CBSE 2011]**

(क) प्र + विश् + ल्यप् (ख) प्रविश्य + ल्यप् (ग) प्रा + विश् + ल्यप् (घ) प्र + विश्य् + ल्यप्

**रेखाङ्कितपदेषु प्रकृति-प्रत्ययोः संयोज्य विभज्य वा उत्तरं लिखत–**

11. साधुः गङ्गायाम् स्नात्वा देवालयम् गच्छति। **[CBSE 2012]**

12. शुकः फलम् खादितुं वृक्षे तिष्ठति। **[CBSE 2012]**

13. अहं नृत् + क्त्वा जलं पिबामि। **[CBSE 2014]**

14. रमेशः मातुलं द्रष्टुं गच्छति। **[CBSE 2014]**

15. अष्टावक्रं वि + ईक्ष् + ल्यप् पण्डिताः अहसन्। **[CBSE 2014]**

16. वानरः फलानि भक्ष् + तुमुन् वृक्षम् आरोहति। **[CBSE 2014]**

17. छात्रः प्रश्नान् अवगम्य उत्तराणि लिखति। **[CBSE 2014]**

18. माता दूरे स्थित्वा शिशुं पश्यति। **[CBSE 2014]**

19. रामः भरतं राज्यं पालयितुम् आदिशत्। **[CBSE 2014, 2016]**

20. सः मित्रस्य गृहसंकेत विस्मृत्य इतस्ततः पश्यति। **[CBSE 2014, 2016]**

21. शिशुः कथाम् उक्त्वा सर्वान् प्रीणयति। **[CBSE 2014, 2016]**

22. त्वं भोजनं कृ + क्त्वा पाठं पठ। **[CBSE 2014, 2016]**

23. सा गृहं प्र + आप् + ल्यप् विश्राम्यति। **[CBSE 2014, 2016]**

24. वानराः शीते कम्प् + तुमुन् आरभन्त। **[CBSE 2014, 2016]**

25. सः कलमं क्रेतुं आपणं गच्छति। **[CBSE 2016]**

26. बालः मातरम् उपगम्य वदति। **[CBSE 2016]**

27. शिशुः चन्द्रं दृष्ट्वा आह्वयति। **[CBSE 2016]**

28. सा गृहं प्र + आप् + ल्यप् विश्राम्यति। **[CBSE 2016]**

29. शिक्षकः उपनेत्रं धृ + क्त्वा पाठं पठति। **[CBSE 2016]**

30. अष्टावक्रः हस् + तुमुन् आरभत। **[CBSE 2016]**

**रेखाङ्कितपदेषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा रिक्तस्थानानि पूरयत–**

31. मित्रम् रुग्णावस्थायाम् (दृश् + क्त्वा) .................... अहम् अतीव दुःखी अभवम्। [CBSE 2012]
32. लुब्धः नरः सन्मार्गम् (त्यज् + तुमुन्) .................................. उद्यतः भवति। [CBSE 2012]
33. अहम् वृक्षम् (आ + रुह् + तुमुन्) .................................... न शक्नोमि। [CBSE 2016]
34. सः शीघ्रं (धावित्वा) ( .................... + .................... ) कन्दुकं गृह्णाति। [CBSE 2016]
35. मम माता भगवतः कथां (श्रु + तुमुन्) ............................ देवालयं गच्छति। [CBSE 2016]
36. मयूराः (नृत् + क्त्वा) .................................................... वृक्षे विश्राम्यन्त। [CBSE 2016]
37. छात्राः पुस्तकानि आ + दा + ल्यप् ............................ पंक्तिबद्धाः तिष्ठन्ति। [CBSE 2016]
38. पुत्रः पितरौ प्रणम्य ( .................... + .................... ) विद्यालयं गच्छति। [CBSE 2016]
39. प्रातराशं कृ + क्त्वा ( .................................... ) छात्राः विद्यालयं गच्छन्ति। [CBSE 2016]
40. गंगाजले प्र + विश् + ल्यप् ( .............................. ) भक्ताः ध्यानं कुर्वन्ति। [CBSE 2016]
41. ग्रीष्मकाले जनाः शीतलपेयम् पा + तुमुन् ( .................................. ) इच्छन्ति। [CBSE 2016]
42. प्राचार्यम् नत्वा ( .................... + .................... ) छात्राः कक्षायां प्रविशन्ति। [CBSE 2016]
43. श्वेतकेतुः उपाध्यायम् उपगम्य ( ................ + ................ ) वेदान् अधीतवान्। [CBSE 2016]
44. समाचारान् श्रु + तुमुन् ( ................ + ................ ) अहं दूरदर्शनं पश्यामि। [CBSE 2016]
45. बलाका दह् + क्त्वा ( .............................................................. ) अपतत्।
46. सेना मार्गम् अव + रुध् + ल्यप् ( .................................................. ) तिष्ठति।
47. सा पुरस्कारं लभ् + तुमुन् ( .................................................... ) आगच्छति।
48. पाठम् आधृत्य ( ........................ + ........................ ) सः अभ्यासं करोति।
49. काष्ठहारः वृक्षान् छेत्तुम् ( .......................... + .......................... ) गच्छति।
50. रक्षकः चौरं ताड् + क्त्वा ( .................................................... ) आनयति।